National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 41-44
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Manoja Tripathy**
Asst. Professor (Guest)
Department Of Sanskrit
Ravenshaw University, Cuttack

**Correspondence:**
**Dr. Manoja Tripathy**
Asst. Professor (Guest)
Department Of Sanskrit
Ravenshaw University, Cuttack

# अर्थशास्त्रे गुप्तचर व्यवस्था-एकं समीक्षात्मकमध्ययनम्

**Dr. Manoja Tripathy**

गुप्तचरसंस्थायाः सृष्टिः प्राचीनकालादेव अभवत् ।यदा मनुष्यः निसग्ङः असुरक्षितं च आसीत्। तदा आत्मरक्षा मनुष्यस्य प्रधानंकर्तव्यमभवत्। अतः स्वरक्षार्थाय तत्परः मनुष्यः स्वस्य चतुःपार्श्वस्य अनुशीलनकुर्वन् शत्रुन् ज्ञात्वा स्वरक्षामकरोत्। शत्रुणां गतिबिधिं ज्ञात्वा तेषां गुप्ततथ्यानां अनुशीलनकृत्वा स्वरक्षामकरणमिति कर्तव्यं “गुप्तचर्या” इति नाम्ना ख्यातः अभूत् ।समयानुक्रमेण यदा राज्यानि संघटितानि तदा एषा व्यवस्था समाजस्य राष्ट्रस्य च प्रधानमङ्गरूपेण परिगणितासीत्। प्रारम्भतः जनेकः गुप्त भावेन तथ्यं संग्रहमकरोत् । परन्तु आवश्यकतानुसारेण संस्था माध्यमेन राज्यं रक्षार्थं राजानः गुप्तचर संस्थाः अस्थापयन्। अधुनापि गुप्तचर व्यवस्था गुप्तचराः तेषां कार्याणि च प्रधानमङ्गरूपेण प्रतिष्ठितं भवति। ‘अर्थशास्त्र’स्य रचयिता आचार्यः कौटिल्यः गुप्तचरव्यवस्था तथा गुप्तचराणां नियुक्तिः श्रेणी विभागः तथा कार्याणि उपरि स्वस्य सुव्यवस्थितः ग्रन्थः अर्थशास्त्रे वर्णानां कृतवान्। सुन्दरं-सरल-उपायेन राज्यस्य परिपालनाय रक्षणार्थाय च गुप्तचर व्यवस्थायांः महत्त्वमस्मिन् ग्रन्थे उल्लिखितमस्ति। परन्तु आर्यसंस्कृतौ मूलं रूपेण विद्यमानाः वेदाः सर्वेषां मूलानि भवन्ति। अतः वेदेषु गुप्तचर-व्यवस्थायाः मूलमस्ति इति विद्वांसः स्वीकुर्वन्ति।

**Key words-** गुप्तचर-व्यवस्था- स्पशः -गुप्तचरः-प्रणिधि- चारचक्षुः -अर्थशास्त्रम्-संस्था- कापटिक-उदास्थितः- गृहपतिकः- वैदेहिक- सत्री- तीक्ष्णः- रसद- भिक्षुकी- RAW- IB- NTRO- SIGINT -CYBER -SATELLITE- HUMINT ।

## वेदेषु गुप्तचर-व्यवस्था

महर्षिमनुना उक्तं **“वेदोऽखिलो धर्ममूलं”**।[1] वेदाः अपौरुषेयाः। वेदेषु सर्वाङ्गपूर्णतया मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरूषार्थाः विवेचिताः, अतः वैदिकवाङ्मये मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिताः। सर्वत्र “वेदाः प्रमाणम्” इति मतं समानतयाङ्गीक्रियते ।

ऋग्वेदे गुप्तचरः ‘स्पश’[2] इति नाम्ना प्रसिद्धोऽस्ति । अमरकोशे ‘स्पशः’ शब्दस्य व्युत्पत्तिः प्राप्यते। यथाः- स्पर्शः पुं स्पशतीति स्पशः।[3] इत्यस्य अपर नामानि भवन्ति चरः। अभिसारः। इत्यमरः। चरो गुढपुरूषः। अभिसरो युद्धम् । प्राणनिरपेक्षो यो द्रव्यार्थं व्याडं हस्तिनं वा योधयति। सोऽभिसरः इत्येके ।पुराणेषु अपि एतेषां वर्णानामस्ति। आङ्ग्लभाषायां स्पश शब्दस्य अर्थं भवति “Wary watcher” अर्थात् “सावधान प्रेक्षकः”। देवराजः इन्द्रः प्रतिकूलपरिस्थितीसमये स्वगुप्तचरैः स्वर्गलोकस्य तथ्यान् संग्रृहीतवान् ।वेदे स्त्री गुप्तचराणामपि व्याख्यानमस्ति। मिश्रकेशी नाम्ना अप्सरा तेषु अन्यतमा।

## स्मृतिशास्त्रेषु गुप्तचराः

स्मृतिशास्त्राणि धर्मशास्त्राणि वा अपि संस्कृतेः प्रामाणिकग्रन्थः। एतेषु निर्मितानि तथ्यानि मानवसमाजस्योपकारीणः भवन्ति। स्मृतिशास्त्रेषु मनुस्मृतिः-याज्ञवल्क्य स्मृतिः-पराशरः स्मृतिः च प्रधानाः भवन्ति। अष्टादश प्रमुखस्मृतिशास्त्रणां मध्ये मनुस्मृतिः प्राचीनतमा। अस्मिन् शास्त्रे सप्तमे नवमे च अध्याये राज्यशासनेन साकं राज्यशासनस्य प्रधानमङ्गरूपेण प्रतिष्ठिता गुप्तचर व्यवस्था आलोचिताभवत्। महर्षिमनुना उक्तं यत् राष्ट्रौ मध्ये शत्रुता मित्रता च सम्बन्धे गुप्तचर भूमिका गुरूत्वपूर्णम् । तस्य मतेन गुप्तचरः दक्षः कुशली मिष्टभाषी च भवेत्। राजा न केवलम् सुदक्षः गुप्तचर

नियुक्तिः कुर्यात् अपि च तेषां कार्याणि निरीक्ष्येत् । गुप्तचरः शत्रुराज्ञः गतिबिधिं निरीक्ष्येत्, स्वराजानं प्रति विश्वासी च भवेत्। महर्षिणा राज्ञः मुख्याष्टकर्तव्यानि रचिताः।

यथा:-

**दूतसंप्रेषणं चैव कार्यशेषं तथैव च ।**
**अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम्।।**
**कृत्स्नं चाष्टबिधं कर्म पञ्चवर्गं च तत्त्वतः।**
**अनुरागापरागौ च मण्डलस्य च।।**[4]

अष्टविधकर्मसु दूतसंप्रेषणं अन्तः पुरप्रचारं मन्त्रीणां निरीक्षणं शत्रुराज्यस्य निरीक्षणं च चतुः कर्माणि। प्रत्यक्षभावेन दूतस्य साहाय्यमपेक्षते । महर्षिणा मनुना राज्ञः शक्तिः वृद्ध्यर्थाय उपायत्रयं निर्दिश्यते।[5] यथा -

१. गुप्तचर नियुक्तिः
२. सैन्य नियुक्तिः
३. स्वराजधर्मपरिपालन

एतेषु सैन्य नियुक्तिः राज्यधर्म परिपालनं च स्वराज्ये शक्तिवर्धौ भवतः । परन्तु शत्रुविषयकं ज्ञानं केवलं गुप्तचर माध्यमेन भवति ।

**गुप्तचरस्य गुणावली**

प्राचीन भारते जनाः न केवलं दैवदुर्वीपाकेभ्यः रक्षार्थं अपितु दुष्टेभ्यः रक्षार्थं प्रकृतिं उपासनामकुर्वन्। राज्यस्य उन्नत्यर्थाय शान्तिप्रतिष्ठा निमित्तं राजभिः गुप्तचराणां नियुक्तिः कार्यम्। दुष्टमतिन् वशीकर्तुं गुप्तचराः राज्ञः चारचक्षुः इवासन्। तेषां कार्यानुसारेण तेषां कर्तव्यानि अपि भिन्नानि आसन् । महाभारतम् - मुद्राराक्षसं - मुक्तिकल्पतरूः-अर्थशास्त्रम् इत्यादिषु ग्रन्थेषु अपि च मनुस्मृतौ कामन्दक नीतिसारे शुक्रनीतौ च गुप्तचराणां अपर नामानि गुणाः कार्याणि च विषयं वर्णितम्। "नीति वाक्यामृते" सोमदेव सूरीणा गुप्तचरस्य चतुर्गुणान् वर्णयति -

**"अमौत्यममान्द्यममृषभाषित्वमभ्युहकत्वं वेति चारगुणः ।"** इति ।।

**इत्यादिनां चतुरता स्फुरन्ति तर्कः च दूतस्य मुख्यगुणाः ।**[6]

"किरातार्जुनीय" महाकाव्ये अपि कथ्यते यत् -

**"कृतप्रणामस्य महीं महीभुजेजितां सपत्नेन निवेदयिष्यतः ।**

**न विव्यथे तस्य मनो नहि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।"**[7]

**गुप्तचराः राज्ञः चारचक्षुः सदृशः आसन् ।**
**यथा -चारः चक्षुः महीक्षिताम् ।**
**कामन्दकीये पञ्चतन्त्रे अपि कथितम् यत् -**
**"गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति द्विजाः।**

**चारैः पश्यन्ति राजानश्चक्षुभ्यामितरे जनाः ।।"**[8]

अतः चाररूपी नयन माध्यमेन यः राजा राज्यं पश्यति तं प्रति सेवकाः विश्वस्थाः भवेयुः ।प्रियं असत्यं वचनं सामयिक भावेन राजानं आनन्दं रतिं। परन्तु अप्रिय सत्यं वचनेन राज्यस्योपकारं भवति । अतः उपजीव्ये कथ्यते-

**"सुलभाः पुरुषाराजन् सततं प्रियवादिनः।**

**अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभाः ।।"**[9]

**अर्थशास्त्रे गुप्तचरव्यवस्था**

अर्थशास्त्रं भारतीय दण्डव्यवस्थायाः मूलं निधिः ।आङ्ग्लोभाषायां कथ्यते यत् - "Arthashāstram is the Bible of Indian political philosophy." । इतिहास पठनात् ज्ञायते यत् विस्तृतं मौर्य साम्राज्यं समृद्धशालिआसीत्। दण्डव्यवस्था-न्यायव्यवस्था-शासननितीः-वाणिज्यादि सर्वेषु विषयेषु राज्यमेतत् उन्नतेः चरमसीमां प्राप्तवान् । साधारण मनुष्यकृते असम्भवं कार्यमेतत् । परन्तु मोर्यशासक चन्द्रगुप्त मौर्यस्य प्रधानामात्य तीक्ष्णवुद्धियुक्त महान् आचार्यः कौटिल्यः स्वप्रतिभा बलेन असम्भवं सम्भवति ।तेन अर्थशास्त्रम् रचितम् ।सोऽपि चाणक्यनीतिः मुद्रा राक्षसं च अलिखत् । तेषु अन्यतमम् अर्थशास्त्रं इति ग्रन्थे राज्यशासनविषयः राजकोशविषयः करस्वीकरणविषयः च विस्तृतरूपेण उक्ताः सन्ति । ग्रन्थेऽस्मिन् अशीत्युत्तरशतानि प्रकरणानि (१८०) पञ्चदश अधिकरणानि (१५) च वर्तन्ते।[10] प्रथमाधिकरणस्य नाम भवति विनयाधिकारिकम् ।अत्र दूतः नियुक्तिः भूतानां प्रकारभेदं कार्यपद्धतिः च विस्तृतमालोचनां वर्तते ।आचार्यकौटिल्यस्य मतेन गुप्तचराः राज्यशासनस्य दृढाङ्गभूताः आसन् । तस्य मतेन गुप्तचराणां भागद्वयं वर्तते।

संस्थाश्रेणीय गुप्तचराः एते राज्याभ्यन्तरे तिष्ठन्ति ।राजसेवकानां उपरि सवदा तेषां दृष्टिः आसन् ।राज्ये शृङखलता शासनं व्यवस्था परिचालना तथा राज्ये शान्तिप्रतिष्ठा एतेषां प्रधानकर्तव्याः आसन् ।

**१. कापटिक**

कपट शब्द युक्तः भवति कापटिक ।परमर्मज्ञः प्रगल्भाश्चात्रः कापटिक। ( ६/१० )

**२. उदास्थितः**

"प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः उदास्थितः"। सः धार्मिकः उत्तमचरित्रसम्न्नः आसीत् ।

**३. गृहपतिकः**

कृषकः वेशधारी एषः पुरूषः सच्चरित्रः दक्षः च भवति। आचार्येण उक्तं यत् कर्षको वृत्तक्षीणः प्रज्ञाशौचयुक्तः गृहप तर्कव्यञ्जना" ।

**४. वैदेहिक**

वैश्यो वेशधारी एषः गुप्तचरः स्ववुद् धबलेन धनं उपार्जयति। सेवकानां पालनं करोति तत् सहितं तेभ्यः माध्यमेन तथ्यं संग्रहम-करोत्। आचार्यस्य मतेन "वाणिजिको वृत्तक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः"।[11]

ये गुप्तचराः इतस्ततः सर्वदा भ्रमणशीलाः राज्यस्य बहिः निवसन्ति ते संञ्चाराः इति नाम्ना ख्यातः ।

**१. सत्री**

मातृपितृविहीनः एषः पुरूषस्य पोषणकारी भवति स्वयं राजा । सः सामुद्रिक शास्त्रं ज्योतिश्शास्त्रं शकुनशास्त्रं व्याकरणम् वर्गीकरण विद्या इद्रजाल कामशास्त्रं च विद्यासु कुशलः । आचार्यः कथयति,

"ये चास्य सम्बन्धिनो वश्यभर्तव्यास्ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रमितधीयानाः सत्रिन् संसर्गः विद्धा वा।"

**२. तीक्ष्णः**

एते निर्मिताः भवन्ति।पशुन् सरीसृपान् च तैः सह युद्ध्यन्ते। अर्थोपार्जन एतेषां मुख्यं कार्यम्।। यथा,

“ये जनपदे शुरस्त्यक्तान्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः” ।

**३. रसद**

विषपुरूषः बन्धुषु निःस्नेहाः क्रुराःआलसाः च भवन्ति रसदाः।

**४. भिक्षुकी**

एषा ब्राह्मणी धृता प्रौढा प्रगल्भा अन्तः पुरे सम्मानितः आह च भवति। अमात्यानां गृहे प्रवेश कर्तुं शक्नोति । परिव्राजिका भवति।[12]

अपि च विपदि काले राजा विभिन्नगुप्तचराणां नियुक्तिः करोति। निम्नलिखितरेखाचित्रे तेषां नामानि तथा तेषां कार्याणि संक्षिप्त रूपेण लिखितम्मस्ति । यथा - अग्निजिवः-

अदितिःस्त्री -अन्धः -आचार्यः -आसनग्राही- उन्मतः -उभय वेतन -कारूः . कर्तन्तिक- कुशीलव -गायक -तापस -जडः -नर्तकी -परिव्राजिका- बन्धकी-लुब्धक- किरातः च इत्यादयः ।

**साम्प्रतिकसमये गुप्तचरव्यवस्था**

छद्मवेशिनः गुप्तचराः अधुनापि देशरक्षार्थं नियुक्ताः भवन्ति ।प्रशासनिक अधिकारैः वर्तमाने काले गुप्तचराः विभिन्नसंस्थाभिः सह संयुक्ताः । यथा कौटिल्येन गुप्तचराणां विविधानि रूपाणि निर्दिष्टानि। तथा आधुनिक भारतऽपि विविधाः गुप्तचराः सन्ति ।ते मुख्यतः त्रिषु विभागेषु विभक्ताः ।

**१. बाह्यगुप्तचराः**

बाह्यगुप्तचरसंस्थाषु प्रमुखः भवति ‘अनुसन्धान विभागः’। आङ्ग्लोभाषायां RAW- Research and analysis wings इति ज्ञायते। एषा संस्था विदेशेषु स्थित्वा कार्यं करोति। शत्रुराष्ट्रस्य गुप्तमन्त्रणामनुसन्धानं रणनीतिसूचना कार्यपन्थानः तथा तत्र स्थिताः भारतीयानां सुखं दुःखं च विषये पद्यानि संगृह्णाति । अर्थशास्त्रे वर्णिता संचारि इव कार्यं करोति ।

एतस्याः स्थापना १९३८ वर्षे अभवत्। संस्थायाः प्रमुखः भवति महानिर्देशकः। परन्तु देशस्य प्रधानमन्त्रीः एतस्याः मुख्यः नियन्त्रणाधिकारी भवति। मुख्यकार्यालयं भारतस्य राजधानी दिल्ल्यां अस्ति। भारतात् बहिः स्थित्वा एषा संस्था कार्याणि निर्वहति। “धर्मो रक्षति रक्षितः” इति भावनया समृद्धा एषा संस्था निरवच्छिन्न देश कृते कार्यारता अस्ति ।

**२. आन्तरिक गुप्तचर व्यवस्था**

कौटिल्येन लिखिताः संस्था सदृशी भारतदेशे आन्तरिक शान्तिः स्थैर्यं च रक्षणार्थाय आन्तरिक गुप्तचर संस्था अस्ति । एतस्याः नाम भवति “गुनवार्ता विभाग” आङ्ग्लोभाषायां IB- Intelligence bureau इति नाम्ना ख्याता ।आन्तरिक सुरक्षार्थाय नियुक्ता इयं संस्था आतङ्कवाद निवारणं देश मध्ये शान्तिरक्षा च एतस्याः प्रधानकार्यमस्ति।

१८८७ वर्षे एतस्याः स्थापना अभवत् ।महानिर्देशकः संस्थायाः प्रमुखः, परन्तु गृहमंत्रीः सर्वोच्चनियन्त्रणकर्ता। राजधानी दिल्ल्यां मुख्यकार्यालयं वर्तते । गृहमंन्त्रालयेन सह एतस्याः सम्बन्धः अस्ति । देशान्तर्गत गुप्तचरकार्यं एतस्याः प्रमुख विशेषता । “ जागृतं अहर्निशं” इत्यस्य आदर्श वाक्यं भवति ।

**३.प्राविधिक गुप्तचर व्यवस्था**

प्रायोगिक विज्ञानं आधुनिक भारतस्य द्रुत प्रगतेः प्रमुख कारणं भवति। अस्मिन् संगणक युगे समस्तं कार्याणि ज्ञानविज्ञानस्य सहायता माध्यमेन सहजसाध्यं भवति । अतः गुप्त तथ्यं संग्रहमपि पूर्वापिक्षतया सहजतरं भवति। राष्ट्रीय प्राविधिक गुप्तचर संस्था NTRO- National technical research organisation वा संकेत सायवर् उपग्रह च माध्यमेन गुप्त पद्यानि संगृह्णाति । अत्याधुनिक प्रायोगिक विज्ञान माध्यमेन गुप्त सूचना संग्रहं एतस्याः विशेषता ।

प्रधानमन्त्रिः एतस्याः सर्वोच्चनियन्त्रणकर्ता तथा महानिर्देशकः अपि एतस्याः प्रमुखः भवति। २००४ वर्षे एतस्याः स्थापना अभवत्। गृहमंन्त्रालयेन सह सम्बन्धिता एषा संस्था SIGINT[13], CYBER[14], SATELLITE[15] च माध्यमेन गुप्त भावेन तथ्यं संग्रहमकरोति । देश कृते एतस्याः वार्ता भवति - ‘राष्ट्ररक्षणम् आद्यकर्तव्यम्” इति ।

एतद् व्यतिरेकः केन्द्रीय गुप्तचर विभाग (CBI- Central crime investigation bureau), अपराधिक अन्वेषणं विभागः (CID- Criminal investigation department), DIA- Defence intelligence agency च प्रमुखाः गुप्तचर संस्था रूपेण विद्यन्ते। परन्तु प्रमुखरूपेण उपरोक्तं संस्थात्रयं मिलित्वा राष्ट्रसुरक्षायायाः आधारमिव कार्यं कुर्वन्ति ।

अर्थशास्त्रे अपि च आधुनिकभारते गुप्तचरव्यवस्थायां मध्ये साम्यं वैषम्यं च

**साम्यबिन्दबः**

**१. राज्यस्य सुरक्षा**

उभयोः युगेषु गुप्तचरव्ववस्थायाः मुख्यं उद्देश्यं राज्यस्य राष्ट्रस्य वा सुरक्षा एव आसीत् ।आन्तरिकं बाह्यं च विपदः राष्ट्रीरक्षणं सर्वत्र समानम् ।

**२. गुप्तसूचनासंग्रहं**

राज्यस्य सुरक्षार्थाय विश्वसनीयसूचनाप्राप्तिः विशेषतः गुप्त सूचना प्राप्तिः एतयोः मुख्यं लक्ष्यं स्यात् ।

**३. शत्रुराष्ट्रे गुप्तचर नियुक्तिः**

उभयोः काले गुप्तचराः शत्रुराज्ये प्रवेशन्ति ।तत्र स्थित्वा सूचना संग्रहं कुर्वन्ति । एतत् कार्यं समानम् ।

**४. आन्तरिकं बाह्यं च प्रति दृष्टिः**

आन्तरिक गुप्तचराः देश मध्ये देशद्रोहिणां अन्वेषणं बाह्यशत्रुणां गतिविधि निरीक्षणं इत्येतौ विषयौ समाधौ ।

**५. मानवगुप्तचराणां उपयोगः**

HUMINT[16] इति शब्दः मानवगुप्तचरान् निर्दिशति। यद्यपि आधुनिक भारते प्रायोगिक विद्यायाः विकासः अस्ति, तथापि मानवगुप्तचराणां प्रयोगः उभयोः काले अनिवार्यः भवति।।

**६. गोपनियता**

गुप्तचरकार्यं सर्वदा अत्यन्तं गोपनीयं भवति। गुप्ताङ्गं रूपेण राष्ट्रनिर्माणाय तत्परः शासकपक्षे तथा राज्यपक्षे अपि गुप्तताभङ्गः राष्ट्रसुरक्षायैः घातकः ।

यद्यपि साधनानि प्रायोगिक विधिः नियमाश्च भिन्नाः सन्ति तथापि राज्यस्य सुरक्षा शान्तिः स्थैर्यरक्षणं हि उभयोः युगयोः परमं लक्ष्यं आसीत् ।

**वैषम्यबिन्दबः**

| | | अर्थशास्त्रं | आधुनिक भारत |
|---|---|---|---|
| १. | आधारं उद्देश्यं च | राज्यस्य संरक्षणं राज्यसत्तायाः स्थैर्यं च प्रमुखमुद्देमासीत्। राज्यहिताय राज्यस्य प्रधानाङ्गभूता आसीत् । | संविधानाधारितं लोकतान्त्रिकं शासनं अधुना विद्यते। नागरिकाराधिकाराणां संरक्षणं प्रधानम्। राष्ट्रस्य सुरक्षा बाह्याभ्यन्तर आपदां निवारणार्थं अद्य व्यवस्था प्रयुज्यते । |
| २. | गुप्तसूचनासंग्रहस्य उपायाः | मानवः गुप्तचरव्यवस्थायाः (HUMINT) प्रधानतया आसीत्। छद्मवेशः प्रलोभनं मिथ्या वार्ता रहस्योपायाः च प्रयुज्यन्ते । | मानवगुप्तचरैः सह् संकेत (SIGINT) प्रायोगिक विधिः (TECHINT) उपग्रह् (SATELLITE) इत्येषां व्यवहारः भवति । |
| ३. | निरीक्षणस्य क्षेत्रम् | मन्त्रिणः सेना नायकाः प्रजाः सर्वदा निरीक्षिताः अभवत् । राजा सर्वेषां कार्याणां पर्यवेक्षकः आसीत् । | आतङ्कवादस्य राष्ट्रविरोधी क्रियायाः गुप्तशत्रवः गतिविधेः अवक्षेणं प्रमुख लक्षमासीत्। अपिच न्यायालय संसदीय पर्यवेक्षणः वर्तते। |
| ४. | नैतिकता यथा विधिः | राजा विधेः परे मन्यते ।राज्यरक्षणार्थं कठोराः उपायाः अपि अनुसरन्ति । | संविधानं सर्वोच्चः भवति। मानवाधिकाराः विधिनियमाः च पालनीयाः । |
| ५. | प्रमुखाः | राजा मन्त्रिभिः सह् व्यवस्थां नियन्त्रयति । | प्रधानमन्त्रिः मन्त्रिभिः सह् मिलित्वा गुप्तचर व्यवस्थायाः कार्यं निर्वहृति । |
| ६. | प्रत्यक्ष नियन्ता | महामात्यः मन्त्रिपरिषदः वा प्रत्यक्ष नियन्ता अभवत् । | अद्यत्वेन समाजे राष्ट्रीय सुरक्षा मन्त्रदात्ता (Nation security advisor) प्रधान नियन्ता अस्ति। |
| ७. | मुख्यालयः | तस्मिन् काले राजधानी राजप्रसादः वा मुख्यालयासीत् । | अधुना नव दिल्ली मुख्यालय भवति। |
| ८. | गुप्तचर प्रकाराः | तदा संस्था संचारि अपि च उभयपक्षे कार्यरताः गुप्तचराः आसन् । | अधुना व्यवसायिक प्रशिक्षिताः च गुप्तचर्यायां नियोजिताः भवन्ति । |

**उपसंहारः**

कौटिल्यार्थशास्त्रे गुप्तचरव्यवस्था मानवकेन्द्रितः रहस्यप्रधानं चासीत्। आधुनिक भारते प्रायोगिक-विद्याधारिता- संस्थागता- विधिनियन्त्रिता -चास्ति। कौटिल्य-अर्थशास्त्रे वर्णिता गुप्तचरव्यवस्था सुविकसितां वैज्ञानिकादृष्ट्वा च उन्नतांमासीत् अपि च आधुनिक-गुप्तचरव्यवस्थायाः मूलरूपमिव भवति। कौटिल्यस्य अर्थशास्त्रे प्रतिपादिताः सुरक्षासिद्धान्ताः अद्यापि प्रासङ्गिकाः सन्ति। आधुनिकसुरक्षाव्यवस्था तेषामेव सिद्धान्तानाम् आधुनिकप्रौद्योगिक्या तथा लोकतान्त्रिकमूल्यैः सह विकसितं रूपम् अस्ति। आधुनिकसुरक्षाव्यवस्था तेषामेव मूलसिद्धान्तान् विज्ञानप्रौद्योगिक्या, लोकतान्त्रिकमूल्यैः, वैश्विकसहकार्येण च अधिकं विकसितवती अस्ति। अतः प्राचीनज्ञानस्य आधुनिकप्रणाल्याः च समन्वयः राष्ट्रस्य सुरक्षायै अत्यन्तम् उपकारकः भवति। कथं रूपेण गुप्तचरव्यवस्था साम्प्रतिक समाजे प्रतिष्ठितमस्ति एतत् मम शोध प्रबन्धस्य उद्देश्यमस्ति ।

**सहायक ग्रन्थसूची**


१ गौरोला वाचस्पति, कौटिल्यम् अर्थशास्त्र, चौखम्बा विद्याभवन, वाराणसी, १९८४

२ सिंह डा. रघुनाथ, कौटिल्ययम् अर्थशास्त्रम्, चौखम्बा संस्कृत सीरिज, २०१५

३ दाहाल आचार्य लोकमणि, संस्कृतसाहित्येतिहासः, चौखम्बा संस्कृत सीरिज, २०१५

४ द्विवेदी डा. कपिलदेव, वैदिक साहित्य एवं संस्कृति, चौखम्बा संस्कृत सीरिज, २०१५

५ उपाध्याय बलदेव, वैदिक साहित्य एवं संस्कृत, शारदा मन्दिर वाराणसी, १९८०

६ मिश्र डा. जयकृष्ण, धर्मशास्त्रस्येतिहासः, चौखम्बा संस्कृत सीरिज, २०१५

७ B.D., Kowboys of R&AW, Lancers Publishers, 2007

८ Subhramanyam K. Indian Security Perspective, ABC Publishers, 1983

९ कांगले आर पी, The Kautilya Arthashā stram, (-Part 1-3), बम्बई विश्वविद्यालय प्रकाशनम्, १९६०

१० भारत संविधान, अनुच्छेद: १९, २१


**पाद टिप्पणी**

1 मनुस्मृतिः-२/६

2 ऋग्वेद दशमोऽध्यायः

3 अमरकोश ३/३/२१३

4 मनुस्मृतिः-सप्तमाध्याय १५३/१५४

5 मनुस्मृतिः-सप्तमाध्याय

6 नीतिवाक्यामृत

7 किरातार्जुनीयम् १/२

8 कामन्दकीय पञ्चतन्त्रम् ३/६३

9 रामायणम् ३/३७/२०

10 History of Sanskrit literature

11 अर्थशास्त्रम् (विनयाधिकारिकम्, गूढोपुरुषोत्पत्ति, अध्याय १०)

12 अर्थशास्त्रम् (विनयाधिकारिकम्, गूढोपुरुषोप्रणिधि, अध्याय ११)

13 Signal intelligence

14 It is an act of practice or obtaining information without permission

15 Surveillance or gather intelligence and monitor foreign countries activities from space

16 Gathering intelligence by agents